**अनुपधि** त्रि० नास्ति उपधिश्छलं यत्र । निष्कपटे सरलव्यवहारे । [ज्ञानलक्षणाधीनज्ञानाविषयीभूते त्रि० ।

**अनुपनीत** पु० न उपनीतः न०त० । अकृतोपनयनसंस्कारे

**अनुपन्यास** त्रि० न उपन्यासः अभावे न०त० । उपन्यासाभावे कथनाभावे । न०ब० । कथनशून्येवागारम्भशून्ये त्रि० ।

**अनुपपत्ति** स्त्री उप+पद–क्तिन् उपपत्तिर्युक्तिः न०त० । युक्त्यभावे, असङ्गतौ च । "तात्पर्य्यानुपपत्तित" इति भाषा० । उपपत्तिश्च न्यायादिमते व्यतिरेकव्याप्तिज्ञानाधीनानुमितिः" आपादकज्ञानाधीना आपाद्यनिश्चयरूपाऽनुभूतिर्वा । यथा पीनोदेवदत्तो दिवा न भुङ्क्ते इत्युक्ते दिवाऽभोजिनः पीनत्वं रात्रिभोजनं विनानुपपन्नमिति" अभोक्तुः पीनत्वासम्भवेन रात्रिभोजनं निश्चीयते तथा हि पीनत्वस्य भोजनव्याप्यतया पीनत्वाभावस्य च रात्रिभोजित्वाभावव्याप्यतानिश्चयेन पीनत्वेन रात्रिभोजनमनुमीयते सा चानुमितिः अर्थापत्तित्वेन व्यवह्रियते इति नैयायिकाः । मीमांसकवेदान्तिभिस्तु कल्पयामि अर्थापद्यामीति विलक्षणानुभवात् अनुमितिभिन्नैव सेति स्वीक्रियते । अधिकमर्थापत्तिशब्दे वक्ष्यते ।

**अनुपपन्न** त्रि० उप+पद–क्त न०त० । उपपत्तिशून्ये ।

**अनुपबाध** त्रि० नास्ति उपबाधा प्रतिबन्धोऽस्य । प्रतिबन्धशून्ये ।

**अनुपम** त्रि०नास्ति उपमा यस्य । अतुल्ये अन्यसादृश्यरहिते अत्युत्कृष्टे ।'बलं प्रमाणं शक्तिश्च परैरनुपमं ममेति रा० । कुमुददिग्गजयोषिति स्त्रीत्यमरः । सुप्रतीकदिग्गजस्त्रियां स्त्रीति मेदिनिः ।

**अनुपमेय** त्रि० केनापि न उपमीयतेऽसौ उप+मि–कर्म्मणि यत् न०त० । अन्यैरतुल्ये, अन्यसादृश्यरहिते ।

**अनुपयुक्त** न उपयुक्तम् उचितं भुक्तं वा न०त० । समुचितभिन्ने अननुरूपे भुक्तभिन्ने च ।

**अनुपयोग** पु० न उपयोगः आनुकूल्यं भोजनं वा न०त० । आनुकूल्याभावे, भोजनाभावे च । न०ब० । आनुकूल्यशून्ये, भोजनशून्ये च त्रि० । [रागनिवृत्तिशून्ये ।

**अनुपरत** त्रि० उपरतः निवृत्तः न०त० । अनिवृत्ते विषय-

**अनुपरति** स्त्री न उपरतिः विषयरागः अभावे न०त० । विषयरागाभावे । [विशेषाज्ञाते अतर्किते ।

**अनुपलक्षित** त्रि० न उपलक्षितः विशेषेण ज्ञातः । विशे-

**अनुपलब्धि** स्त्री न उपलब्धिः अभावे न०त० । लाभाभावे प्रत्यक्षाद्यभावे च । तत्र अनुपलब्धिश्च न केवलं इन्द्रियादिसन्निकर्षाभावमात्रेण, किन्तु तत्सन्निकर्षेऽपि कारणान्तरादपि भवति यथोक्तं सांख्यसूत्रे । "सौक्ष्म्या-त्तदनुपलब्धिरिति" । तदेव कारिकायां विवृतम् 'अतिदूरात् सामीप्यादिन्द्रियघातान्मनोऽनवस्थानात् । सौक्ष्म्याद्व्यवधानादभिभवात् समानाभिहारादिति "नास्ति घटोऽनुपलब्धेरिति" । योग्यपदार्थस्यानुपलब्धिश्च अभावज्ञानसामग्री । तद्विवरणं योग्यानुपलब्धिशब्दे दृश्यम् ।

**अनुपवीत** पु० न उपवीतं यज्ञसूत्रं विधिना जातमस्य । अनुपनीते मानवके । उपवीतरूपयज्ञसूत्रशून्ये च ।

**अनुपशम** पु० न उपशमः शान्तिः निवृत्तिर्वा अभावे त०त० । शान्त्यभावे, निवृत्त्यभावे च ।

**अनुपसंहारिन्** पु० न्यायमते परिभाषिते दुष्टहेतुविशेषे । स च अन्वये व्यतिरेके च दृष्टान्तरहितत्वेन दुष्टोहेतुः । यथा सर्वमनित्यं प्रमेयत्वादित्यनुमाने सर्वस्यापि पक्षत्वेन अन्वये दृष्टान्तो नास्ति नापि व्यतिरेके दृष्टान्तः, सर्वस्यापि प्रमेयतया तदभावस्य कुत्राप्यसिद्धेः । "तथैवानुपसंहारी केवलान्वयिपक्षक" इति । "आद्यः साधारणस्तु स्यादन्योऽसाधारणो मतः । तथैवानुपसंहारी त्रिधा नैकान्तिको मत" इति च भाषा० मुक्तावल्यान्तु सर्वमभिधेयं प्रमेयत्वादित्यादिकं तदुदाहरणत्वेनोपन्यस्तं "केवलान्वयिपक्षक इत्यस्य च केवलान्वयिसाध्यक इत्येतत् परतया व्याख्यातञ्च । यथा "केवलान्वयिधर्म्मावच्छिन्नपक्षक इत्यर्थः । सर्वमभिधेयं प्रमेयत्वादित्यादौ सर्व्वस्यैव पक्षत्वात् सामान्याधिकरण्यग्रहस्थलान्तराभावान्नानुमितिः इदन्तु न सम्यक् । पक्षैकदेशे घटसहचारग्रहेऽपि क्षतेरभावात् अस्तु वा सहचारग्रहस्तावतापि पक्षे अज्ञानरूपासिद्धिरेव न तु-हेत्वाभासत्वं तस्य, तथापि केवलान्वयिसाध्यकत्वं तत्त्वमित्युक्तम् । उपसंहाराकारके त्रि० ।

**अनुपसेचन** त्रि० नास्ति उपसेचनं व्यञ्जनं यत्र । दध्यादिव्यञ्जनशून्ये अन्ने "स यत्तदन्नस महिमानं विद्यादि" त्युपक्रम्य 'नाल्प इति ब्रूयान्नानुपसेचन" इति उक्तम्, अथ० ११,३,४ ।

**अनुपस्कृत** त्रि० उप+कृ–प्रतियत्ने क्त सुट् न०त० । अकृतपाकादिसंस्कारे अविकृते च "कुन्यन्नानि पयः सोमो मांसं यच्चानुपस्कृतमिति" मनुः अनुपस्कृतं पाकोपस्काररहितमिति रघु० । "अविकृतमिति", कुल्लू० । अपरिष्कृते "अजमश्वमयश्चैव राजतञ्चानुपस्कृतमिति" मनुः । दृष्टप्रयोजनानपेक्षे, "ब्राह्मणार्थे गवार्थे वा देहत्यागोऽनुपस्कृत"